सम्पादकः – आवीरलालगङ्गोपाध्यायः (स्नातकतृतीयवर्षीयः)
आलङ्कारिकौ – तथागतमण्डलः (स्नातकोत्तरप्रथमवर्षीयः)
शुभदीपपालः(स्नातकद्वितीयवर्षीयः)
वर्षम् – १, अङ्कः – ४(शारदीयः)
प्रकाशदिनाङ्कः – १.१०.२०१५ वासरः – गुरुः


| | |
|---|---|
| अहो भारतीयधर्मशास्त्रमाहात्म्यम् | उत्तम घोषः |
| दुर्गापूजा | शुभङ्कर दासः |
| दैन्यग्रासः | सुखदेव-साउः |
| शारदप्रातः | आवीरलाल गङ्गोपाध्यायः |
| सङ्घजननी माता सारदा | बुलेट्-मण्डलः |
| शारदीया | राजेश-अधिकारी |
| तथ्यमञ्जूषा | मलय माइतिः |
| अधिकेन अलम्... | |

# ॥ अहो भारतीयधर्मशास्त्रमाहात्म्यम् ॥

उत्तम घोषः, स्नातकप्रथमवर्षीयः

आहारनिद्राभयमैथुनञ्च सामान्यमेतत् पशुभिर्नराणाम्।
धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिस्समानाः॥

अदन्ति पशवः वयमपि अद्मः, पशवः निद्रापरतन्त्राः भवन्ति वयमपि भवामः। परन्तु वयं न पशवः, यतः अस्माकं विशेषत्वेन धर्मो विद्यते, तेषां तु धर्मो नास्ति। तर्हि कः तावद्धर्मो यत्सत्त्वे पशुभ्यः नराः पृथक्क्रियन्ते विशिष्यन्ते? ध्रियते लोकः अनेन, धरति लोकं वेति विग्रहे धृञ् धारणपोषणयोः इति धातोः मनिन्प्रत्यये धर्मशब्दो निष्पद्यते। धर्मः अस्मान् सर्वान् धारयति रक्षति च। उच्यते हि-

धारणाद्धर्म इत्याहुर्धर्मो धारयते प्रजाः।
तस्माद्धर्मं प्रशंसन्ति धर्मो रक्षति रक्षितः॥ इति।

पुनश्च शिष्यते अनेनेति शास्त्रं यदस्माननुशास्ति तद्भवति शास्त्रम्। यथा पित्रा पुत्रः अनुशिष्यते यदिदं त्वया कर्तव्यमिदन्न कर्तव्यम् इत्येवं तद्भवति धर्मशास्त्रम्। अत्र वक्ष्यते न केवलं धर्मशास्त्रमपि तु भारतीयधर्मशास्त्रम्। भारतीयधर्मशास्त्रं पाश्चात्यादिधर्मशास्त्रेभ्यः विशिष्टतामापद्यते। पाश्चात्याः ब्रुवन्ति यत् तेषां धर्मे दीक्षाग्रहणानन्तरं भगवति यीशौ आत्मसमर्पणमृते नान्यः पन्था विद्यते, महम्मदीयाः कथयन्ति यत्तेषां धर्मे दीक्षाग्रहणानन्तरं कौराणी सरणिरेव नाकसुखसन्दायिनी, एवं बौद्धाः जैनाः सर्व एव ईश्वरप्राप्तये स्वस्वमतमेकमद्वितीयञ्च प्रतिपादयन्ति, परन्तु भारतीयधर्मशास्त्रं न तथा कदापि ब्रुवन्ति, अस्माकं नये सर्वे धर्माः समाना एव। लक्ष्यं तु ईश्वरप्राप्तिस्तद्धिन्दुधर्मेण वा महम्मदीयधर्मेण वा भवतु तत्र का क्षतिः? लक्ष्यं तु दुग्धपानं तद् काचपात्राद्वा भवतु पाषाणपात्राद्वा तत्र किम्प्रयोजनम्? पुनश्च तावदेव पात्रेण प्रयोजनं यावद् दुग्धो न पीयते। पीते दुग्धे पात्रं त्यज्यते, एवञ्च पानात्परं काचपात्रात्पीतदुग्धस्य पाषाणपात्राद्वा पीतदुग्धस्य पुष्टिः समाना एव, तद्वत्तावता एव धर्मेण प्रयोजनं यावता मुक्तिर्न भवति मुक्तौ सति न कोऽपि धर्मोऽवशिष्यते, पुनश्च मुक्तौ सति हिन्दुधर्मावलम्बिनोऽपि यानुभूतिः सा एव खलु मुसलिमधर्मावलम्बिनाम्। उक्तञ्च शिवमहिम्नस्तोत्रे-

रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां

नृणामेको गम्यस्त्वमसि पयसामर्णव इव॥इति।

पुनश्च भारतीयधर्मशास्त्रं न तु मन्दिरमस्जिदादिस्थानेषु ईश्वरं प्रतिपादयति अपि च प्रतिपादयति प्रत्येकं जनमानसे। भारतीयधर्मशास्त्रमेव वदति यत्सर्वभूतेषु एव ईश्वरो विद्यते- "ईशा वास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्", "सर्वं खल्विदं ब्रह्म"- इत्याद्युपनिषद्वचनमत्र प्रमाणम्। वयमपरस्मिन् तदा एव द्विष्यामो यावदस्मासु भेदो वर्तते। परन्तु अहं मयि यमीश्वरं साक्षात्करोमि तमेव यदि अपरस्मिन् सर्वत्र पश्यामि तदा सर्वमेव ईश्वरमयं स्यात् खलु। तदा को वा द्वेषकर्ता किं वा द्वेषपात्रम्। तदा नापि द्वेषो न वा हिंसा अवशिष्यते। तदा एव भारतीयधर्मघनमूर्तेः श्रीरामकृष्णस्य "शिवज्ञानेन जीवसेवा" इति वचनं सार्थकं स्यात्। तथाह्युच्यते श्रीमद्भागवते –

यो मां सर्वेषु भूतेषु सन्तमात्मानमीश्वरम्।
हीत्वार्चां भजते मौढ्याद् भस्मन्येव जुहोति सः॥ इति।

आम्नातञ्च ईशोपनिषदि –

यस्तु सर्वाणि भूतान्यात्मन्येवानु पश्यति।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते॥ इति।

एवञ्च by default भारतीयसनातनधर्मः सर्वेषां विद्यते। कथमित्युक्ते, भारतीयधर्मशास्त्रे न तु आचारादिना धर्मः निश्चीयते अपि च व्यवहारेण स्वभावेन एव। एवं यः तथाभूतः ख्रिष्टीयः, जैनः, बौद्धो वा सर्वः एव भारतीयसनातनधर्मे अन्तर्भुक्तः।

# ॥ दुर्गापूजा ॥

## शुभङ्कर दासः, स्नातकप्रथमवर्षीयः

बङ्गभूमेः प्रधानोत्सवो दुर्गापूजा। समग्रसंवत्सरस्य दीर्घप्रतीक्षानन्तरम् आयाति अयमुत्सवः। प्रत्येकं जातेः स्वस्य किमपि वैशिष्ट्यं वर्तते, तदेव तज्जातिं परिचाययति। बङ्गीयानां तथा बङ्गभूमेः तद्वैशिष्ट्यमेव दुर्गापूजारूपम्। दिनचतुष्टयस्येयं पूजा, परन्तु पूजाप्रस्तुतिर्वर्षं व्याप्य भवति।

भगवत्याः दुर्गाया विषये पुराणादिशास्त्रेषु विविधा आख्यायिकाः प्राप्यन्ते। क्वापि राज्ञः सुरथस्य कथायां, क्वापि मधुकैटभवधप्रसङ्गे, क्वापि महिषासुरमर्दने, रामायणेऽपि दृश्यन्ते।

श्रूयते यद्भगवत्या दुर्गाया शरत्कालीनाया अस्याः पूजायाः प्रचलनं भगवता रामावतारेण कृतम्। तथाहीयं पूजा अकालबोधननाम्नापि ख्यातिं गता। देवीभागवतादिपुराणानुसारेण किष्किन्ध्यावस्थानसमये नारदोपदेशं स्वीकृत्य जगद्रावणस्य रावणस्य वधाय श्रीरामचन्द्रैः देव्या आराधना विहिता। अपि च मधुकैटभवधसमये विष्णुना प्रजापतिना च देवी स्तुता।

उत्सवो नोऽयं प्रधानतो महिषासुरमर्दिन्या महिषासुरवधे ख्यातः। श्रीमार्कण्डेयपुराणमते ब्रह्मणो वरेण बलीयान् पुरुषाजेयो महिषासुरः सुरान् विजित्य सुरलोकमधिकृतवान्। तदा मदोन्मत्तोऽयं हन्तव्यो भवतीति मत्वासुरेभ्यः सुराणां रक्षायै महेशरमेशादयो देवाः स्वतेजांस्येकत्रीकृतवन्तः, तदा तत्तेजसा नारीमूर्तिरेका प्रादुर्भूता। सैव महामाया जगन्मयी जगन्माता दुर्गेति समाख्याता। ततः परं दशभुजा सा महालक्ष्मीरूपं स्वीकृत्य नारीशक्तिं न्यक्क्रियमाणं महिषासुरं ससैन्यं जघान। तथाह्येकस्मिन् पार्श्वे नारीशक्तेः जागरणं तथा नारीशक्त्याप्यशुभनाशः सम्भवतीत्यपि प्रकाश्यते मातुरागमनेन।

बङ्गसंस्कृतौ देवी दुर्गा दुर्गतिनाशिनी नैसर्गेण नगेशनन्दिनीनाम्नाम्नाता। गिरिजा गौरी गिरिशेन परिणीता। तयोः परिणयानन्तरं प्रतिवत्सरं माता आश्विने मासि पित्रालयं समायाति। महालयातः षष्ठीं यावद् देव्या आवाहनं क्रियते। षष्ठ्यां देव्या बोधनं भवति। सप्तम्या रात्रितो प्रतिमण्डपं भ्रमन्ति जनाः। निखिलनगर्या मार्गाः आलोकस्रोतस्नाता भवन्ति। अष्टम्यां प्रातरञ्जलिप्रदानं तथा नवम्यां सन्धिपूजादिभिः प्रातःकालो गच्छति। परं

रात्रौ सूर्येऽस्तमिते नरो नार्यश्च पथि मिलिता भवन्ति। पित्रा मात्रा सख्या सह वा सर्वे आबालवृद्धा भगवद्दर्शनं कुर्वन्ति। एवंप्रकारेण दिनचतुष्टयं सानन्देन अतिवाहिता भवन्ति। परं दशम्यां समेषां चित्तं विषण्णं भवति। शङ्करी शङ्करालयमेष्यति। दधिकडम्बादिद्वारा पूजा समाप्यते। परं ज्येष्ठान् प्रति प्रणतिज्ञापनं तथा कनिष्ठान् बान्धवांश्च प्रति प्रीतिज्ञापनं भवति। सायमालोकमालया सज्जीकृत्य देवीप्रतिमाविसर्जनाय गङ्गां प्रति नीयते।

बहुरूपेण बहुनाम्ना देवी मर्त्यलोकमाविशति स्वसन्तानस्वान्तेच्छासिध्यर्थम्। महामायया मायया मायिकवस्तुषु बद्धा भवन्ति जीवाः। किञ्च, शशिशेखरायाः शुभाशीषबलात् संसारगहनात् मुक्ता भवन्ति मानवाः। अतोऽन्तिमे विबुधेन्द्रादिवद् अस्माकमपि वन्दना –

त्वं वैष्णवीशक्तिरनन्तवीर्या विश्वस्य बीजं परमासि माया।
सम्मोहितं देवि समस्तमेतत्त्वं वै प्रसन्ना भुवि मुक्तिहेतुः॥ इति शिवम्॥

# ॥ दैन्यग्रासः ॥

## सुखदेव-साउः, स्नातकतृतीयवर्षीयः

बाल्यकाले अहम् एकस्मिन् क्षुद्रनगरे न्यवसम्। तस्मिन् नगरे एव अस्माकम् उच्चतरविद्यालय आसीद्। मन्ये तदा अहं प्राथमिकविद्यालयं त्यक्त्वा अस्मिन् विद्यालये पञ्चमकक्षायां पठनार्थम् आगतवान्। अस्माकं कक्षा त्रिषु विभागेषु विभक्ता आसीद्। सा कखगनाम्ना उच्यते स्म। अहं तदा कमध्ये पठन् आसम्। अस्माकं वर्गे प्रायः पञ्चाशत् छात्राः पठन्ति स्म। तेषु रहीमराणा नामकः कश्चन छात्रः अस्माकं सहपाठी आसीद्। सः प्रत्येकं दिवसे विद्यालयं विलम्बेन आगच्छति स्म। तस्य वस्त्रादिकमपि समीचीनं नासीद्। स एकं छिन्नं यूतकं तथा एकम् अतिमलिनम् उरूकं धृत्वा विद्यालयं आगच्छति स्म। विद्यालयेन पाठ्यक्रमे स्थापितानां विषयाणां कृते यानि पुस्तकानि दीयन्ते तानि सः प्रत्यहं एकस्मिन् छिन्नापणस्यूते आनयति स्म, तथा च वर्गे सर्वदा सः अन्तिमासने उपविशति स्म। शिक्षकाः यदा तं पाठं पृच्छन्ति तदा स निरुत्तर एव तिष्ठति स्म सदा। तेन शिक्षकाः क्रुद्धाः अभवन्। ते तस्मै तस्य अपठनस्य कारणम् अपृच्छन्, परन्तु रहीमः तदापि निरुत्तर एव तिष्ठति स्म।

एकस्मिन् दिवसे अहं विद्यालयं विलम्बेन गतवान् तस्माद् रहीमेण सह अन्तिमासने उपविशन् आसम्। तस्मिन्दिने अशोकमहोदयस्य भूगोलवर्गे रहीमः शिक्षकस्य प्रश्नस्य उत्तरं प्रदातुं न शक्तवान्। अशोकमहोदयः तदा क्रुद्धः सन् तं पृष्टवान् – पठनं किमर्थं न कृतम् इति। परन्तु रहीमः शिक्षकाय किमपि न उक्तवान्। तदा शिक्षकः अधिकक्रुद्धः सन् तस्मै भृशं वेत्राघातं दत्तवान्। यदा रहिमः शिक्षकस्य वेत्राघातं सोढुं न शक्तवान् तदा सः रुदन् अकथयत् - ह्यः विद्यालयविरामानन्तरम् अहं मात्रा सह मार्गे भिक्षां याचितुं गतवान् तस्माद् कथं पठितुमुपविशामि?

शिक्षकः स्तम्भितः पृष्टवान् – तव पिता किं करोति?

रहीमः रुदन् उवाच – पिता नास्ति, सः तु षण्मासात् प्राक् दिवंगतः।

एतद् श्रुत्वा अशोकमहोदयः स्तब्धः अभवत् सः रहीमस्य मस्तकस्योपरि स्वहस्तं स्थापितवान्। मन्ये महोदयस्य नेत्रयोः अश्रुविन्दवः आगताः। वयं तु सर्वे स्तब्धाः सन्तः एतद् दृश्यं पश्यन्तः आस्म।

# ॥ शारदप्रातः ॥

आवीरलाल गङ्गोपाध्यायः, स्नातकतृतीयवर्षीयः

गता वर्षा अस्मान्मुहुरमृतधाराप्तभुवनात्
तमोहन्ता भानुर्लसति जलदोन्मुक्तनभसि।
सिताभ्रैः संसेव्यो विमलकराशाली भवसुहृत्
नभोरत्नोद्भासः सरसिजमिवाक्ष्णोः शिशिरदः॥ १ ॥

अहो प्राणोन्मेषः शरदरुणकान्तिं दिशि दिशि
विकीर्णां सम्प्रेक्ष्य प्रमुदितमहोत्साहितभुवि।
प्रभातोऽयं शुभ्रः परमगुणसिन्धौ गत इव
प्रफुल्लः संहृष्टः परिमलसमीरैस्तरुवरः॥ २ ॥

कुसुमिततरुशाखा प्राञ्जलिं दातुकामा
सुरभितपृषदश्वः स्वेदशान्त्यैः प्रवृत्तः।
अमलधवलपाथः पादयोः स्थातुकामं
त्रिभुवनमपि सिद्धं सेवितुं विश्वधात्रीम्॥ ३ ॥

नवीना जीमूता बत धवलकान्तिं विदधते
नवीनोऽयं भानुः सुखकरकरैः श्लिष्यति भुवम्।
नवा लीलाकाशे लसति जलदादित्यकरयोः
महामायारूपं नभसि भवतीव प्रकटितम्॥ ४ ॥

विलासोऽन्तेऽस्मिन् वककलरवाणां दिशि दिशि
समीरोऽयं हृद्यः सुरभिसुवहापुष्पनिवहैः।
मरुत्स्पर्शः काशे हृदयहरणस्निग्धमधुरो
धरित्री सन्नद्धा त्रिभुवनविधात्रीं वरयितुम्॥ ५ ॥

शारदे शारदप्रातः शारदैः कुसुमव्रजैः ।
सन्नद्धं सततं मातः पादयोस्ते समर्पणे ॥ ६ ॥

## ॥ सङ्घजननी माता सारदा ॥

### बुलेट्-मण्डलः, स्नातकतृतीयवर्षीयः

यदा यदा हि धर्मस्य ग्लानिर्भवति तदा तदा भगवान् धराधामे आविर्भवति। जनान् साधुमार्गे प्रेरयितुं भगवान् यदा मनुष्यरूपेणाविर्भवति तदा तस्य शक्तिरपि मनुष्यरूपेणावतरति। षट्त्रिंशदधिकाष्टादशशततमखीष्टाब्दे भगवान् श्रीरामकृष्णः अवततार। तस्य शक्तिरपि श्रीसारदादेवीरूपेणावततार।

श्रीसारदादेवी बङ्गदेशस्य बाँकुडामण्डलान्तर्गते जयरामबाटी इत्याख्ये ग्रामे त्रिपञ्चाशदधिकाष्टादशखीष्टाब्दस्य डिसेम्बरमासस्य द्वाविंशतितमे दिनाङ्के श्यामासुन्दरीदेव्यां जनिं लेभे। तस्याः पिता रामचन्द्रमुखोपाध्यायः भक्तप्रवरो ब्राह्मण आसीत्। नवपञ्चाशदधिकाष्टादशशततमखीष्टाब्दे श्रीरामकृष्णसारदादेव्याः परिणयः जातः।

ध्यानसौकर्यार्थं शिष्यैः स्वल्पाहारिभिः भाव्यमिति धिया भगवान् श्रीरामकृष्णः रात्रिभोजनस्य परिमाणं निर्दिष्टं कृतवान्। परन्तु सारदादेवी अधिकमेव भोजनं शिष्यान् भोजयति स्म। एकदा श्रीरामकृष्णः सारदादेवीमुक्तवान् यत् तेषां साधनजीवने अधिकभोजननिमित्तमसौविध्यं भवति। तदा तेषां योगमहं वहामीत्युत्तरितवती माता सारदा।

भगवान् श्रीरामकृष्णः तस्य शिष्यान् गैरिकवस्त्रं जपमालाञ्च प्रदाय श्रीरामकृष्णसङ्घस्य बीजमुप्तवान्। श्रीरामकृष्णे दिवंगते माता सारदा वैधव्यवेशं स्वीकर्तुं करकङ्कणं भञ्जयितुं यदा आरब्धवती तदा श्रीरामकृष्णः तत्सम्मुखे आविर्भूय उक्तवान् – अहं तु केवलमेकस्मात् प्रकोष्ठात् प्रकोष्ठान्तरं प्रविष्टवान्। कङ्कणं मा भञ्जयतु। त्वया मत्पुत्राः परिपालनीयाः। ततः प्रभृतिः सा कङ्कणं हस्ते एव धारितवती भगवच्छिष्यान् स्वपुत्ररूपेण च पालितवती।

श्रीरामकृष्णस्य महासमाध्यनन्तरं तस्य शिष्याः किंकर्तव्यविमूढाः सञ्जाताः। एकं स्थानमपि नासीत् यत्र ते जपध्यानादिकं कुर्युः। प्रायः बुभुक्षिताः ते भवन्ति स्म। तदा माता सारदा श्रीरामकृष्णं प्रार्थितवती यत् – ये जनाः तव शरणे आगताः तेषां भोजनवस्त्रवासस्थानस्य अभावः यथा न भवेदिति। माता सारदा कदापि प्रेम्णा कदापि च

कठोरनियमेन शिष्यान् शास्ति स्म। यदि कदापि शिष्याणां मध्ये मतपार्थक्यं भवति स्म तदा मातुः मतमेव सर्वैः स्वीक्रियते स्म। रामकृष्णसङ्घस्य केचन चिन्तयति स्म यत् - स्वामिविवेकानन्देनारब्धं सेवाकार्यं श्रीरामकृष्णस्यादर्शानुसारं नास्ति। माता सारदा यदा काशीक्षेत्रे आसीत् तदा एकं वृद्धाश्रमं द्रष्टुं गतवती। आश्रमं दृष्ट्वा सा उक्तवती वृद्धानां सेवा क्रियते चेत् साक्षात् नारायणसेवा भवति। एते आश्रमचालकाः सम्यक् कार्यं कुर्वन्ति। तदनन्तरं शिष्याणां मध्ये सेवाकार्यविषये यन्मतपार्थक्यमासीत्तद्दूरीभूतम्।

माता सारदा निष्कामतया कर्म सम्पादयितुं प्रोत्साहयति स्म। परन्तु कर्मणि यथा आसक्तः न भवेत् तदर्थमपि सा उपदिशति स्म। एकवारं सा स्वामितन्मयानन्दमुक्तवती यत् – जनाः संसारं परित्यज्य आश्रममागच्छन्ति। परन्तु अत्र आसक्ताः सन्तः केचन आश्रमं त्यक्तुं न इच्छन्ति।

रामकृष्णसङ्घस्य चालिकाशक्तिरासीत् सा। विभिन्नसमये सा शिष्यान् उपदिशति स्म। ते उपदेशाः सङ्घस्य नियमाः सञ्जाताः। तस्या उपदेशानुसारमेव सर्वे शिष्याः जीवनमग्रे नयन्ति स्म। स्वामिविवेकानन्दः मातुः अनुमतिं लब्ध्वैव शिकागोनगरे हिन्दुधर्मस्य माहात्म्यं समग्रविश्वस्य समक्षं श्रावितवान्॥

# ॥ शारदीया ॥

## राजेश-अधिकारी, स्नातकप्रथमवर्षीयः

दुर्गोत्सवो हि बङ्गवासिनां श्रेष्ठतमः उत्सवेषु। शरदः मेघमाला तुलाराशिरिव गगने इतस्ततः दरीदृश्यते, मन्दं मन्दं प्रवाहमानः पवनः काशकुसुमान् निरन्तरं नर्तयति, ग्रामे ग्रामे वृक्षान् हरितवर्णः समाच्छादयति, श्रूयते हि चतसृषु दिक्षु मातुरागमनध्वनिः। आम्, आगतः अतिक्रान्ते वत्सरे तादृशः निखिलदुःखदैन्यादीन् परित्यज्य आत्मजनानां मिलनावसरः। पितुरालयमागच्छति अस्मदानन्ददायिनी दशप्रहरणधारिणी माता दुर्गा। बङ्गदेशस्य कोणे कोणे उत्सवस्यैव प्रतिध्वनिः पणवनिनादरूपेण निरन्तरं श्रूयते। आधुनिके काले दुर्गोत्सवः न केवलं धर्मीयोत्सवरूपः, वत्सरस्य सर्वोत्कृष्टोऽयं समयः आनन्दस्य, भ्रमणस्य, भोजनस्य, आत्मीयानां पुनर्मेलनस्य च। न केवलं सनातनधर्मावलम्बिनः बङ्गीयाः, अपि तु भारतवर्षस्य सर्वत्र विराजमानानां जातिधर्मवर्णादिनिखिलभेदं तुच्छीकृत्य सर्वेषामेव हासपूर्णमिदमुत्सवस्य दिवसपञ्चकम्।

पुरा रावणं निहत्य तद्धस्तात् सीतामुद्धृत्य स्वपुरं गमिष्यतीति श्रीरामः स्वसङ्कल्पसिद्धये देव्याः दुर्गायाः आशीर्वचनं कामयामास। यद्यपि रामायणस्य मूले एतदुदन्तं न लभ्यते, तथापि कृत्तिवासरचितमिदं सर्वे एव स्वीकुर्वन्ति बङ्गीयाः। अन्याप्येका प्रसिद्धा कथा अस्ति। हिमालयस्य तनयाम् उमां परिणीय शिवस्तु स्वगृहं कैलाशं जगाम, परन्तु पितृगृहं नायाति चेत् धर्मविरुद्धमिति चिन्तयता शिवेन प्रतिवत्सरं स्वभार्या पितृगृहं सम्प्रेष्यते। अतः समाप्ते पर्जन्ये प्रतिवत्सरं सस्यपरिपूर्णे गृहे सति पार्वती सपुत्रं पितृगृहमायाति।

परन्तु यां प्रतिमां वयं प्रतिमण्डपं पश्यामः, न सा गृहकन्यायाः उमायाः प्रतिमा, सा तु महिषासुरमर्दिनीरूपा। रूपस्यैतस्य प्रमाणं प्राप्यते केषुचित् पुराणेषु। पुरा आसीत् कोऽपि महिषव्याजी असुरः यः प्रायः शतं वर्षाणि देवान् पीडयन् एकदा इन्द्रस्य सभां विभज्य देवान् विताड्य स्वयं तदासनमधिरुरुह। अथ देवाः वृत्तमेतत् ब्रह्मविष्णुशिवानां पुरस्तात् न्यवेदयन्। तदा देवत्रयाणां तथा देवानां क्रोधविस्फारितेभ्यः चक्षुर्भ्यः प्रचण्डं तेजः निर्गम्य पर्वतीभूय विशालाकायां देवीं ससर्ज। अपरूपां महामहिमशालिनीम् अमितशक्तिधारिणीं तां देवीं दृष्ट्वा देवाः चकितचकिताः सञ्जाताः, नूनमियम् असुरनाशाय समर्था भविता, नूनं देवाः अनयैव राक्षसग्रासात् स्वर्गं पुनः उद्धरिष्यन्ति इति चिन्तयामासुः। तस्यै सर्वे

दत्तवन्तः विभिन्नानि स्वस्वशस्त्राणि। स्वयं नगेन्द्रः विशालं मृगेन्द्रमेकं उपायनत्वेन तस्यै ददौ।

एषा एव महिषासुरमर्दिनी दुर्गतिनाशिनी दुर्गा। समारब्धे महति युद्धे महिषमृगेन्द्रगजादिरूपैः बहुभिर्व्याजैः देव्या साकं युयोध असुरः। अन्ते च सर्वान् राक्षसान् निहत्य शूलविघातेन असुरराजमपि ननाश। असुरनाशिन्याः मातुर्जयघोषेण स्वर्गलोके पुनः पीयूषधाराप्रवाहः समारब्धः। तदा –

इत्थं यदा यदा बाधा दानवोत्था भविष्यति।

तदा तदावतीर्याहं करिष्याम्यरिसंशयम्॥इति अभयवाणीं व्याहरयन्ती देवी गगने विलीना। एतादृश्येव श्रीश्रीचण्ड्याश्रिता कथा महालयायाः प्रातः वेतारयन्त्रेषु 'महिषासुरमर्दिनी'-नाम्नि अनुष्ठाने सर्वैरेव श्रुयते बङ्गीयैः।

बङ्गेषु दुर्गापूजायाः 'बारोयारीपूजा'-इत्येकं नाम बहुत्र प्रचलिता वर्तते। तद्विषये एका किंवदन्ती वर्तते – ऊनविंशतितमखीष्टाब्दस्यादिमे द्वादश(बारो) मित्राणि(इयार्) मिलित्वा एतादृशीं पूजां चक्रतुः इत्यर्थमेषा 'बारोयारीपूजा' इति कथ्यते। सर्वे सम्मिलिताः सन्तः एषा पूजा विधीयते इत्येतदर्थं 'सार्वजनीना' एषा पूजा इत्यप्यभिधा प्रसिद्धा। अधुना तथा धर्मीयपूजारूपेणैव नैषा वर्तते, विविधमण्डपनिर्माणे, प्रतिमाप्रदर्शने, आलोकसज्जायां नैपुण्यादिप्रदर्शनादिविविधवैचित्र्यचित्रणे कलाविदां स्वेषां नैपुण्यं दरीदृश्यते। एतादृशं वैचित्र्यं द्रष्टुमेव समावेशः सर्वेषाम्। एवमेव धर्ममतिक्रम्य सञ्जातोऽयं सांस्कृतिकोत्सवेषु श्रेष्ठतमः।

समाप्तायां नवमीरजन्यां मातुर्विदायवेला समुपस्थिता भवति। दशम्याः निर्दिष्टे अवसरे मातरं मिष्टान्नादिभोजनपुरःसरं ललाटे बङ्गवधूनां हस्तात् सिन्दूरलेपादिकर्म समाप्य पणवके विदायध्वनिं निनाद्य सर्वे घोषं कुर्वन्ति- "ठाकुर् थाकबे कतक्षण, ठाकुर याबे विसर्जन॥" (मातृप्रतिमा कियत्कालं स्थास्यति, सा तु विसर्जिता भविष्यति)। किन्तु किं विसर्जनेन, तस्याः एव प्रतिश्रुतिः विपदि सा पुनः आगमिष्यतीति। अत एव नद्यां विसर्जयन्तः सर्वे मानवाः मिलित्वा उच्चैः उद्घोषयन्ति-"आश्छे बछोर आबार् हबे"(आगामिनि वर्षे पुनरायातु)। आरब्धा पुनः प्रतीक्षा मातुः पुनरागमनस्य॥

## ॥ तथ्यमञ्जूषा ॥

### मलय माइतिः, स्नातकतृतीयवर्षीयः

- एवारेस्टविजेत्री प्रथमनारी वाचेन्द्री-पालः।
- कनीयसी एवारेस्टविजेत्री मालावातपूर्णा।
- भारतवर्षस्य प्रथममहिलामुख्यमन्त्रिणी सुचेता कृपालिनी।
- भारतवर्षस्य प्रथममहिलाराज्यपाला सरोजिनी नाईडुः।
- पृथिव्यां प्रथममहिलाप्रधानमन्त्रिणी सिरिमाभो वन्दरनायेकः (श्रीलङ्का)।
- आलिम्पिक्प्रतियोगितायां प्रथममहिलापदक्विजेत्री कर्णम्मालेश्वरी।
- पृथिव्यां प्रथममहिलाराष्ट्रपतिः इसाबेल् पेरन् (Isabel Peron) ।
- नोवेलविजेत्री प्रथमनारी मेरी कुरी (पदार्थविद्या)।
- अस्कारविजेत्री प्रथमनारी कैथरिन् विगेलो (Kathryn Bigelow)।
- कनीयसी नोवेलविजेत्री मालाला इउसुफ़जाई।

**(क्रमशः)**

## अधिकेन अलम्...

आयाति विश्वजननी हरिनेत्रनिवासिनी निरुपमा भगवती देवी । तस्या एव आगमने मोदमानानि बङ्गमानसानि। अस्मद्विवेकभास्करे अस्मदीयमनसा साधकमनोभास्वन्तीं मातरम् आराधयितुं तत्सन्ततिभूता वयमपि नितरां प्रफुल्लिताः समुत्सुकाः अस्मदीयरचनाकुसुमैः समुपस्थिताः।

अस्मिन् अङ्के नूतनतया तथ्यमञ्जूषा इति भागः समारब्धः। प्रत्यङ्कं तत्र नवं नवं तथ्यं भवत्समक्षम् उपन्यस्यते। अङ्कोऽयं खलु मातरि समर्पिता, अतः अस्मिन् अङ्के नारीणां साफल्यज्ञापकानि तथ्यानि सङ्कलितानि। अथ आ परितोषाद् विदुषाम्... इति

**सम्पादकस्य**